# Shri Sitarama Ashtakam

# શ્રીસીતારામાષ્ટકમ્

## Document Information

Text title : sItArAmAShTakam

File name : siitaaraama8.itx

Category : aShTaka, raama

Location : doc_raama

Author : achyutayati

Transliterated by : http://www.webdunia.com

Proofread by : Kirk Wortman kirkwort at hotmail.com

Latest update : January 13, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 29, 2023

*sanskritdocuments.org*

# શ્રીસીતારામાષ્ટકમ્

બ્રહ્મમહેન્દ્રસુરેન્દ્રમરુદ્ગણરુદ્રમુનીન્દ્રગણૈરતિરમ્યં
 ક્ષીરસરિત્પતિતીરમુપેત્ય નુતં હિ સતામવિતારમુદારમ્ ।
ભૂમિભરપ્રશમાર્થમથ પ્રથિતપ્રકટીકૃતચિદ્ઘનમૂર્તિં
 ત્વાં ભજતો રઘુનન્દન દેહિ દયાઘન મે સ્વપદામ્બુજદાસ્યમ્ ॥ ૧॥

પદ્મદલાયતલોચન હે રઘુવંશવિભૂષણ દેવ દયાલો
 નિર્મલનીરદનીલતનોઽખિલલોકહૃદમ્બુજભાસક ભાનો ।
કોમલગાત્ર પવિત્રપદાબ્જરજઃકણપાવિત ગૌતમકાન્ત
 ત્વાં ભજતો રઘુનન્દન દેહિ દયાઘન મે સ્વપદામ્બુજદાસ્યમ્ ॥ ૨॥

પૂર્ણ પરાત્પર પાલય મામતિદીનમનાથમનન્તસુખાબ્ધે
 પ્રાવૃડદભ્રતડિત્સુમનોહરપીતવરામ્બર રામ નમસ્તે ।
કામવિભઞ્જન કાન્તતરાનન કાઞ્ચનભૂષણ રત્નકિરીટ
 ત્વાં ભજતો રઘુનન્દન દેહિ દયાઘન મે સ્વપદામ્બુજદાસ્યમ્ ॥ ૩॥

દિવ્યશરચ્છશિકાન્તિહરોજ્જ્વલમૌક્તિકમાલવિશાલસુમૌલે
 કોટિરવિપ્રભ ચારુચરિત્રપવિત્ર વિચિત્રધનુઃશરપાણે ।
ચણ્ડમહાભુજદણ્ડવિખણ્ડિતરાક્ષસરાજમહાગજદણ્ડ
 ત્વાં ભજતો રઘુનન્દન દેહિ દયાઘન મે સ્વપદામ્બુજદાસ્યમ્ ॥ ૪॥

દોષવિહિંસ્રભુજઙ્ગસહસ્રસુરોષમહાનલકીલકલાપે
 જન્મજરામરણોર્મિમયે મદમન્મથનક્રવિચક્રભવાબ્ધૌ ।
દુઃખનિધૌ ચ ચિરં પતિતં કૃપયાદ્ય સમુદ્ધર રામ તતો મામ્
 ત્વાં ભજતો રઘુનન્દન દેહિ દયાઘન મે સ્વપદામ્બુજદાસ્યમ્ ॥ ૫॥

સંસૃતિઘોરમદોત્કટકુઞ્જરતૃટ્ક્ષુદનીરદપિણ્ડિતતુણ્ડ
 દણ્ડકરોન્મથિતં ચ રજસ્તમ ઉન્મદમોહપદોજ્ઝિતમાર્તમ્ ।
દીનમનન્યગતિં કૃપણં શરણાગતમાશુ વિમોચય મૂઢમ્
 ત્વાં ભજતો રઘુનન્દન દેહિ દયાઘન મે સ્વપદામ્બુજદાસ્યમ્ ॥ ૬॥

જન્મશતાર્જિતપાપસમન્વિતહૃત્કમલે પતિતે પશુકલ્પે
    હે રઘુવીર મહારણધીર દયાં કુરુ મય્યતિમન્દમનીષે ।
ત્વં જનની ભગિની ચ પિતા મમ તાવદસિ ત્વવિતાપિ કૃપાલો
    ત્વાં ભજતો રઘુનન્દન દેહિ દયાઘન મે સ્વપદામ્બુજદાસ્યમ્ ॥ ૭॥

ત્વાં તુ દયાલુમકિઞ્ચનવત્સલમુત્પલહારમપારમુદારં રામ
    વિહાય કમન્યમનામયમીશ જનં શરણં નનુ યાયામ્ ।
ત્વત્પદપદ્મમતઃ શ્રિતમેવ મુદા ખલુ દેવ સદાવ સસીત
    ત્વાં ભજતો રઘુનન્દન દેહિ દયાઘન મે સ્વપદામ્બુજદાસ્યમ્ ॥ ૮॥

યઃ કરુણામૃતસિન્ધુરનાથજનોત્તમબન્ધુરજોત્તમકારી
    ભક્તભયોર્મિભવાબ્ધિતરિઃ સરયૂતટિનીતટચારુવિહારી ।
તસ્ય રઘુપ્રવરસ્ય નિરન્તરમષ્ટકમેતદનિષ્ટહરં વૈ યસ્તુ
    પઠેદમરઃ સ નરો લભતેઽચ્યુતરામપદામ્બુજદાસ્યમ્ ॥ ૯॥

॥ ઇતિ શ્રીમન્મધુસૂદનાશ્રમશિષ્યાચ્યુતયતિવિરચિતં
શ્રીસીતારામાષ્ટકં સમ્પૂર્ણમ્ ॥

*Shri Sitarama Ashtakam*

pdf was typeset on September 29, 2023

Please send corrections to *sanskrit@cheerful.com*